इति वैद्यकपथ्यापथ्यविधिः ॥) समष्ठिलक्षः। शियुवृक्षः। इति राजनिर्घण्टः। (भवे घञ्।) दंशनम् ॥

उपदर्शकः, पुं, (उपदर्शयतीति। उप+दृश्+णिच्+ण्वुल्।) द्वारपालः। इत्यमरटीकासारसुन्दरी॥ (दर्शयितरि, त्रि॥)

उपदा, स्त्री, (उपदीयते इति। उप+दा+"आतश्चोपसर्गे" इत्यङ्।) उपढौकनम्। इत्यमरः॥ ("उपदा विविशुः शश्वत् नोत्सेकाः कोशलेश्वरम्"। इति रघुः। ४। ७०।)
"प्रत्यर्पयं पूजामुपदाच्छलेन"। इति रघुः। ७।३०।)

उपदानकं, क्ली, (उपदान+स्वार्थे कन्।) उत्कोचः। इति त्रिकाण्डशेषः॥

उपदिष्टः, त्रि, (उप+दिश्+क्त।) उपदेशप्राप्तः। यथा। "ननु शूद्रस्यापि सगोत्रा कथं न निषिध्यते इति चेदत्र उपदिष्टातिदिष्टगोत्रस्यैव निषेधो न त्वतिदिष्टातिदिष्टशूद्रगोत्रादेरिति"। इत्युद्वाहतत्त्वम्॥

उपदी, स्त्री, (उपेत्य दीयते छिद्यते इति उप+दो+क+ङीप्।) वन्दाकः। इति राजनिर्घण्टः॥ परगाछा इति भाषा॥

उपदेवता, स्त्री, (उपगता सादृश्येन देवताम्।) यक्षभूतादिः॥ (उपदेवताश्च दश। यथाह अमरः।
"विद्याधरोऽप्सरो यक्षो रक्षो गन्धर्व्वकिन्नरौ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" ॥)

उपदेशः, पुं, (उप+दिश्+घञ्।) मन्त्रकथनम्। तत्पर्य्यायः। दीक्षा २। यथा।
"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते" ॥
इति रामार्च्चनचन्द्रिका॥ कलावत्यादिदीक्षायामसामर्थ्ये संक्षेपो यथा।
"तत्राप्यशक्तः कश्चिच्चेदभ्यर्च्य साक्षतम्।
तदम्बुनाभिषिच्याष्टवारं मूलेन केकरम्॥
निधायाष्टौ जपेत् कर्ण उपदेशे त्वयं विधिः" ॥
इति विश्वसारतन्त्रम्॥ हितकथनम्। (यथा, हितोपदेशे विग्रहे उक्तम्।
"उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये" ॥) शिक्षणम्। (यथा, मनुः ८। २७२।
"धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः"।
"एवमित्युपदेशः। यथा। तथा न जागृयात् रात्रौ दिवास्वप्नञ्च वर्जयेदनेन कारणेनेत्युपदेशः॥ अथोपदिश्यते मधुरेण श्लेष्माभिवर्द्धत इति"।
इति सुश्रुते उत्तरतन्त्रे ६५ अध्यायः॥)

उपदेशी, [न्] त्रि, (उपदिशति यः। उप+दिश्+णिनि।) उपदेष्टा॥ (यथा हितोपदेशे मित्रलाभे।
"गतानुगतिको लोकः कुट्टनीमुपदेशिनीम्।
प्रमाणयति नो धर्म्मे यथा गोघ्नमपि द्विजम्" ॥)

उपदेष्टा, [ऋ] त्रि, (उपदिशति यः। उप+दिश्+तृच्।) उपदेशकर्त्ता। यथा।
"तथोपदेष्टारमपि पूजयेच्च ततो गुरुम्।
न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया" ॥
इति तिथ्यादितत्त्वम्॥ वृहस्पतिः।
"उपदेष्टानुमन्ता च लोके तुल्यफलौ स्मृतौ"।
इत्याह्निकतत्त्वञ्च॥

उपदेहिका, स्त्री, (उपदेहो विद्यते यस्याः। उपदेह+ठन्।) कीटविशेषः। तत्पर्य्यायः। उपजिह्वा २ वम्री ३ उपदीका ४। इति हेमचन्द्रः॥

उपद्रवः, पुं, (उप+द्रु+अप्।) उत्पातः। इति हलायुधः॥ रोगारम्भकदोषप्रकोपजन्योऽन्यो विकारः। (तल्लक्षणमुक्तं वैद्यके। यथा,—
"यो व्याधिस्तस्य यो हेतुर्दोषस्तस्य प्रकोपतः।
योऽन्यो विकारो भवति स उपद्रव उच्यते" ॥
"व्याधेरुपरि यो व्याधिः उपद्रव उदाहृतः।
सोपद्रवा न जीवन्ति जीवन्ति निरुपद्रवाः" ॥
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये।
"तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूलएवोपद्रवसंज्ञः"। इति सुश्रुते सूत्रस्थाने ३५ अध्याये॥)

उपद्रष्टा, [ऋ] त्रि, (उप+दृश्+बाहुलकात्तृच्।) उपदर्शकः। उदासीनबोधरूपत्वेन गुणप्रचारदर्शी। इति गीताटीका॥
("उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः"। इति गीतायां १३। २२। साक्षी पुरुषः। यथा,
"ऋत्विग्यजमानेषु यजनकर्म्मव्यापृतेषु तत्समीपस्थोऽन्यः स्वयमव्यापृतो यज्ञविद्याकुशलत्वात् ऋत्विग्यजमानव्यापारगुणदोषाणां ईक्षिता तद्वत् कार्य्यकारणव्यापारेषु स्वयमव्यापृतो विलक्षणस्तेषां कार्य्यकारणानां सव्यापाराणां समीपस्थो द्रष्टा उपद्रष्टा साक्षी पुरुषः" ॥)

उपधर्म्मः, पुं, (उपहीनोधर्म्मः।) पाषण्डः। इति श्रीभागवतम्॥ (यथा मनुः २। २३७।
"एष धर्म्मः परः साक्षात् उपधर्म्मोऽन्य उच्यते"॥)

उपधा, स्त्री, (उपधीयते शुद्धिज्ञानमत्र। उप+धा+"आतश्चोपसर्गे" इत्यङ्+टाप्।) राज्ञां धर्म्मकामार्थभयैरमात्यादेर्यत् परीक्षणम्। इत्यमरः॥ धर्म्मार्थकाममोक्षद्वारा परीक्षा। यथा।
"धर्म्मार्थकाममोक्षैश्च प्रत्येकं परिशोधनैः।
उपेत्य धीयते यस्मादुपधा परिकीर्त्तिता॥
अर्थकामोपधाभ्यान्तु भार्य्याः पुत्त्रांश्च शोधयेत्।
धर्म्मोपधाभिर्व्विप्रांस्तु सर्व्वाभिः सचिवान् पुनः"॥
इति कालिकापुराणे ८५ अध्यायः॥ ("भूयोभूयश्चोपधाभिर्विशोध्य तं मे मतिसहायमकरवम्"। इति दशकुमारचरिते विश्रुतचरिते।) पदानामुपान्त्यवर्णः। इति व्याकरणम्॥

उपधातुः, पुं, (उप सादृश्ये। धातुसदृशो धातुः।) अष्टप्रधानधातुसदृशधातुः। स तु सप्तधा यथा। माक्षिकम् १ तुत्थकम् २ अभ्रम् ३ नीलाञ्जनम् ४ मनःशिला ५ हरितालम् ६ रसाञ्जनम् ७। शरीरस्थधातुभवोपधातुः सप्तधा यथा। रसात् स्तनदुग्धम् १ रक्तात् स्त्रीरजः २ मांसात् वसा ३ मेदसो घर्म्मः ४ अस्थ्नो दन्तः ५ मज्जनः केशः ६ शुक्रात् ओजः ७। इति वैद्यकम्॥
("स्तन्यं रजश्च नारीणां काले भवति गच्छति।
शुद्धमांसभवस्नेहः सा वसा परिकीर्त्तिता॥
स्वेदो दन्तास्तथा केशास्तथैवौजश्च सप्तमम्।
इति धातुभवा ज्ञेया एते सप्तोपधातवः" ॥
इति शार्ङ्गधरेण पूर्व्वखण्डे पञ्चमेऽध्याये उक्तम्॥
"सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम्।
तुत्थं कांस्यं च रीतिश्च सिन्दूरश्च शिलाजतु" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

उपधानं, क्ली, (उपधीयते आरोप्यते मस्तकमत्र। उप+धा+अधिकरणे ल्युट्।) शिरोधानम्॥ बालिश इति भाषा। तत्पर्य्यायः। उपबर्हः २। इत्यमरः। गण्डुः ३। इति जटाधरः।
("सोपधानां धियं धीराः स्थेयसीं खट्टयन्ति ये"। इति माघः २।७७। "पट्टोपधानाध्यासितशिरोभागेन"। इति कादम्बरी।) विषम्। प्रणयः। इति मेदिनी। व्रतम्। इति हेमचन्द्रः॥

उपधानीयं, क्ली, (उपधीयते यस्मिन्। उप+धा+अनीयर्।) उपधानम्। इति शब्दरत्नावली॥

उपधिः, पुं, (उपधीयते आरोप्यतेऽनेन। उप+धा+किः।) कपटः। इत्यमरः॥ (यथा, मनुः ८।१६५।
"योगाधमनविक्रीतं योगदानप्रतिग्रहम्।
यत्र वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्" ॥
"अरिषु हि विजयार्थिनः क्षितीशाः
विदधति सोपधि सन्धिदूषणानि"।
इति किराते॥१।४५।) रथचक्रम्। इति हेमचन्द्रः॥

उपधूपितः, त्रि, (उप+धूप्+क्त।) आसन्नमरणः। परिधूपितः। इति मेदिनी॥

उपधृतिः, स्त्री, (उप+धृ+क्तिन्।) किरणः। इति हेमचन्द्रः॥

उपनतः, त्रि, (उप+नम्+क्त।) उपस्थितः। इति हेमचन्द्रः॥ ("अचिरोपनतां स मेदिनीं"। इति रघुः ८।७।) नम्रः। यथा, माघे। १२। ३३।
"शौरेः प्रतापोपनतैरितस्ततः
समागतैः प्रश्रयनम्रमूर्त्तिभिः" ॥)

उपनदं, } क्ली, नद्याः समीपम्। इति मुग्धबोध-
उपनदि, } व्याकरणम्॥ (तथा पाणिनीये।
"नदीपौर्णमास्याग्रहायणीभ्यः"। ५। ४। ११०।
इत्यनेन सिद्धम्॥)

उपनयः, पुं, (उप समीपे नीयते येन कर्म्मणा। उप+नी+अच्।) उपनयनम्। इति हेमचन्द्रः॥
("गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः।
बालो वेदाय तद्योगात् बालस्योपनयं विदुः"॥
इति स्मृतिः। भावे+अच्। प्रापणम्। यथा, महाभारते ३। २। २४।
"मानमस्य प्रियाख्यानैः सम्भोगोपनयैरङ्गनाम्"॥
न्यायमते यो यो धूमवान् स सवह्निमान् अयमपि तथेत्यादिरूपः न्यायावयवभेदः॥)

उपनयनं, क्ली, (अध्ययनार्थं आचार्य्यस्य उप समीपं नीयते येन कर्म्मणा इति। उप+नी ल्युट्।) ब्राह्मणक्षत्त्रियवैश्यानां यज्ञसूत्रधारणादिरूपप्रधानसंस्कारः। अध्यापनार्थमाचार्य्यसमीपं नीयते येन कर्म्मणा तदुपनयनम्। यथा स्मृतिः।
"गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः।